ॐ ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादन कारकम् ।
वेदवृत्तोद्भवं पुण्यं तत्पुण्याहं ब्रुवन्तु नः ।

भो ब्राह्मणाः ! मम सकुटुम्बस्य-सपरिवारस्य गृहे पुण्याहं भवन्तो ब्रुवन्तु ।

तत्पश्चात् ब्राह्मण पूजनकर्ता से तीनबार निम्न वाक्य कहें:—

ॐ पुण्याहम्, ॐ पुण्याहम्, ॐ पुण्याहम् ।
ॐ पुनन्तु मा देवजनाः पुनन्तु मनसाधियः ।

पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा ॥

तत्पश्चात् पूजनकर्ता ब्राह्मणों से निम्न वाक्य कहें:—

ॐ पृथिव्यां उद्धृता यान्तु यत्कल्याणं पुराकृतम् ।
ऋषिभिः सिद्धगन्धर्वैः तत्कल्याणं ब्रुवन्तु नः ॥

भो ब्राह्मणाः ! मम सकुटुम्बस्य-सपरिवारस्य भवन्तो ब्रुवन्तु ।

तत्पश्चात् ब्राह्मण पूजनकर्ता से तीन वार निम्न वाक्य कहें—

ॐ कल्याणम्, ॐ कल्याणम्, ॐ कल्याणम् ।

तत्पश्चात् आचार्य पूजनकर्ता से निम्न उच्चारण करवाते हुए कहवाये :—

सागरस्य च या लक्ष्मीर्महालक्ष्म्यादिभिः कृता ।
सम्पूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः ॥

भो ब्राह्मणाः ! मम सकुटुम्बस्य-सपरिवारस्य गृहे ऋद्धिं भवन्तो ब्रुवन्तु ।

तत्पश्चात् ब्राह्मण प्रत्युत्तर में तीन वार निम्न वाक्य कहें:—

ॐ कर्म ऋद्ध्यताम्, ॐ कर्मऋद्ध्यताम्, ॐ कर्म ऋद्ध्यताम् ।

तत्पश्चात् आचार्य पूजनकर्ता से निम्न श्लोक और वाक्य कहवाये:--

स्वस्त्यस्तु ह्यविनाशाख्या नित्यं मङ्गलदायिनीम् ।
विनायकप्रिया नित्यं तां च स्वस्ति ब्रुवन्तु नः ॥

भो ब्राह्मणाः ! मम सकुटुम्बस्य-सपरिवारस्य गृहे स्वस्तिं भवन्तो ब्रुवन्तु ।

तत्पश्चात् ब्राह्मण प्रत्युत्तर में तीनबार निम्न वाक्य कहें:--

ॐ स्वस्ति, ॐ स्वस्ति, ॐ स्वस्ति ।

तत्पश्चात् आचार्य पूजनकर्ता निम्न श्लोक और वाक्य कहवाये :—

समुद्रमथनाज्जाजा जगदानन्दकारिका ।
हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः ॥

भो ब्राह्मणाः ! मम सकुटुम्बस्य-सपरिवारस्य गृहे श्रीरस्त्विति भवन्तो ब्रुवन्तु ।

तत्पश्चात् ब्राह्मण प्रत्युत्तर में तीन बार निम्न वाक्य कहें :—

ॐ अस्तु श्रीः, ॐ अस्तु श्रीः, ॐ अस्तुश्रीः ।

तत्पश्चात् आचार्य पूजनकर्ता को तिलक कर आशीर्वाद निम्न वेदमन्त्र और श्लोक द्वारा प्रदान करे:—

तिलक—

ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा

विश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्ट नेमिः स्वस्ति-नो बृहस्पतिं दधातु ॥

आशीर्वाद—

श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात् पवमानं महीयते । धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥

तत्पश्चात् आचार्य निम्न सङ्कल्प द्वारा ब्राह्मणों को पूजनकर्ता की शक्ति के अनुसार दक्षिणा दिलावाये :-

ॐ अद्य पुण्याह वाचन साङ्गता सिद्ध्यर्थं पुण्याह वाचकेभ्यो नानानाम गोत्रेभ्यो ब्राह्मणेभ्य इमां यथाशक्ति हिरण्य मूल्य द्रव्य दक्षिणां सम्प्रददे ।

-: इति स्वस्ति-पुण्याह-वाचनम् :-

❋ षोडश मातृका पूजनम् ❋

आचार्य लकड़ी के पीढ़े पर अथवा चौकी पर लाल वस्त्र बिछाकर सोलह कोष्ठों का निर्माण करे और प्रत्येक कोष्ठ में गोधूम या अक्षत पुञ्ज रख उनके ऊपर एक-एक सुपारी रखे और पूजनकर्ता से निम्न श्लोक का उच्चारण करवाये और अक्षत छुड़वाये:—

ॐ गौरी पद्मा शची मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥
हृष्टिः पुष्टिस्तथा तुष्टिः आत्मनः कुलदेवताः।
गणेशेनाधिका ह्येता वृद्धौ पूज्याश्च षोडश ॥

ॐ भूर्भुवः स्वः मातृकाभ्यो नमः, इहागच्छत इहतिष्ठत ॥

ॐ गौर्यादि षोडशमातृकाभ्यो नमः।

उपरोक्त गौर्यादिषोडश मातृकाओं का पूजन पञ्चोपचार अथवा षोडशोपचार से आचार्य पूजनकर्ता से करवाये और पूजन के पश्चात् आचार्य पूजनकर्ता से निम्न प्रार्थना करवाकर अक्षत छुड़वाये :—

ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तुते ॥

ॐ भूर्भुवः स्वः गौर्यादि षोडश मातृकाभ्यो नमः, अनया पूजया गौर्यादि षोडशमातरः प्रीयन्ताम्।

-: इति षोडशमातृका पूजनम् :-

❀ सप्तघृत-मातृका-पूजनम् ❀

आचार्य पूजनकर्ता से लकड़ी के पीढ़े पर श्वेतवस्त्र बिछवा कर उसे रक्तसूत्र या कच्चे सूत से बँधवा दे और घृतयुक्त सिन्दूर से सात बिन्दियाँ अङ्कित करवा दे (बिन्दियाँ क्रमानुसार रहेंगी, ऊपर से नीचे तक) तथा पूजनकर्ता के हाथों में अक्षत् पुष्पादि देकर निम्न श्लोक द्वारा षोडशोपचार अथवा पञ्चोपचार से पूजन करवाये :—

श्रीश्च लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा सरस्वती ।
माङ्गल्येषु प्रपूज्यन्ते सप्तैता घृतमातरः ॥

ॐ भूर्भुवः स्वः सप्तघृत मातृकाभ्यो नमः, इहागच्छत इहतिष्ठत ॐ सप्तघृत मातृकाभ्यो नमः।

तत्पश्चात् आचार्य पूजनकर्ता से निम्न श्लोक द्वारा हाथ जुड़वाकर प्रार्थना करवाये और अक्षत् छुड़वाये : —

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजन प्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥ १ ॥

नमः सर्वहितार्थायै जगदाधार हेतवे ।
साष्टाङ्गोऽयं प्रणामस्तु प्रयत्नेन मया कृतः ॥ २ ॥

ॐ भूर्भुवः स्वः सप्तघृत मातृकाभ्यो नमः, अनया पूजया सप्तघृत मातरः प्रीयन्ताम् ।

-: इति सप्तघृत मातृका पूजनम् :-

❋ आयुष्य मन्त्र जपः ❋

आचार्य अपने यजमान (पूजनकर्ता) की आयु वृद्धि के निमित्त निम्न श्लोक और वेदमन्त्रों का एकाग्रचित होकर पाठ करे :—

ॐ यदायुष्यं चिरं देवाः सप्तकल्पान्त जीविषु ।
ददुस्तेनायुषा युक्ता जीवेम शरदः शतम् ॥
दीर्घा नागा नगा नद्योऽनन्ताः सप्तार्णवा दिशः ।
अनन्तेनायुषा तेन जीवेम शरदः शतम् ॥
सत्यानि पञ्चभूतानि विनाशरहितानि च ।
अविनाश्यायुषा तद्वज्जीवेम शरदः शतम् ॥
ॐ आयुष्यं वर्चस्यर्ठ० रायस्पोषमौद्भिदम् ।
इदर्ठ० हिरण्यं वर्चस्व जैत्रायाविशता दुमाम् ॥

ॐ यदा बध्नन् दाक्षायणा हिरण्यर्ठ० शतानी-
काय सुमनस्यमानाः। तन्म ऽआबध्नामि शत
शारदाया युष्मान् जरदष्टिर्यथासम् ॥

—: इति आयुष्य मन्त्र जपः :—

❀ नान्दी श्राद्धम् ❀

आचार्य पूर्व की तरफ विश्वेदेव के आसन स्थान पर कुशा उत्तराग्र रखे तथा तीन आसन दक्षिण पूर्वाग्र क्रमानुसार रखें। आसनों की दूरी अधिक न हो, केवल आसन एक दूसरे से आपस में सटे न रहें।

तत्पश्चात् आचार्य पूजनकर्ता से उन स्थापित आसनों पर विश्वेदेव सहित उसके पितरों की पूजा निम्न प्रकार [1] सव्य से ही आरम्भ करवाये, सर्वप्रथम आचार्य पूजनकर्ता के मस्तक तथा श्राद्ध सामग्री पर पवित्रीकरण हेतु निम्न श्लोक द्वारा जल छिड़कवाये :—

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

१—सव्यः- अनस्मदवृद्ध शब्दानां अरूपाणां अगोत्रिणाम्।
अनाम्नां अतिलाद्य श्च नान्दीश्राद्धं च सव्यवत् ॥

ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु ।

तत्पश्चात् आचार्य पूजनकर्ता से यव, कुश, जल द्वारा निम्न सङ्कल्प करवाये :

ॐ अद्यामुकगोत्राणां मातृ-पितामही-प्रपितामहीनां अमुकाऽमुकीदेवीनां नान्दीमुखानां तथा अमुकाऽमुकगोत्राणां पितृ-पितामह-प्रपितामहानां-अमुकामुकगोत्राणां मातामह-प्रमातामह-वृद्ध-प्रमातामहीनांअमुकामुकशर्मणां सपत्नीकानां नान्दीमुखानांअमुकगोत्रस्याऽमुकप्रवरस्याऽमुक-शर्मणः नान्दीमुखश्राद्धकर्मणि सांकल्पिकेन श्राद्ध-महं करिष्ये ।

सङ्कल्प के पश्चात् आचार्य पूजनकर्ता से पादप्रक्षालनार्थं निम्न क्रमानुसार जल प्रदान करवाये : —

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः । ॐ मातृ-पितामहि-प्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदं

वः पाद्यं पादवनेजनं पादप्रक्षालनं वृद्धिः। ॐ पितृ-पितामह-प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वःपाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः। ॐ मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्नी-काः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः।

पाद प्रक्षालन के पश्चात् आचार्य पूजनकर्ता से पितरों के निमित्त आसन निम्न क्रमानुसार प्रदान करवाये:

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इमेआसने वो नमः। मातृ-पितामहीप्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इमेआसने वो नमः। ॐ पितृ-पितामह-प्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इमेआसने वो नमः। ॐ मातामह-प्रमातामह-वृद्धप्रमाता-महाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इमेआसने वो नमः।

आसन प्रदान के पश्चात् आचार्य पूजनकर्ता से पितरों के निमित्त जल, वस्त्र, यज्ञोपवीत, रोली, अक्षत्, पुष्प, धूप, नैवेद्य,

ऋतुफल, ताम्बूल, लवङ्ग, इलायची, सुपारी तथा सुगन्धित इत्र आदि निम्न क्रमानुसार प्रदान करवाये :—

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः। ॐ मातृ-पितामही-प्रपितामह्यः नान्दी-मुख्यः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः। ॐ पितृ-पितामह-प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः।

ॐ मातामह-प्रमातामह-वृद्धाप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः।

गन्धादि दान के पश्चात् आचार्य पूजनकर्ता से विश्वेदेव सहित पितरों के निमित्त भोजन निष्क्रय की दक्षिणा निम्न क्रमानुसार प्रदान करवाये :—

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्म ब्राह्मणभोजन पर्याप्त आमान्न निष्क्रयभूतं द्रव्यं अमृत रूपेण स्वाहा

सम्पद्यतां वृद्धिः। ॐ मातृ-पितामही-प्रपितामह्यः नान्दी मुख्यः ॐ भूर्भुवः स्वः इदं युग्म ब्राह्मण भोजन पर्याप्त आमान्न निष्क्रयभूतं द्रव्यं अमृत रूपेण स्वाहा सम्पद्यतां वृद्धिः। ॐ पितृ-पितामह-प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्म ब्राह्मण भोजन पर्याप्त आमान्ननिष्क्रयभूतं द्रव्यं अमृत रूपेण सम्पद्यतां वृद्धिः। ॐ मातामह-प्रमातामह-वृद्ध प्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्म ब्राह्मण भोजन पर्याप्तं आमान्न निष्क्रयभूतं द्रव्यं अमृत रुपेण स्वाहा सम्पद्यतां वृद्धि।

भोजन निष्क्रय निमित्त दक्षिणा प्रदान के पश्चात् आचार्य पूजनकर्ता से निम्न क्रमानुसार दुग्ध सहित यवादि प्रदान करवाये :—

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः प्रीयन्ताम्। ॐ मातृ-पितामही-प्रपितामह्यः नान्दी-मुख्यः प्रीयन्ताम्। ॐपितृ-पितामह-प्रपितामहाः नान्दीमुखाः प्रीयन्ताम्। ॐ मातामह-प्रमातामह-

वृद्ध-प्रमातामहाः सपत्नीकाः नान्दीमुखाः प्रीयन्ताम् ।

दुग्ध सहित यवादि वितरण करवाने के पश्चात् आचार्य पूजनकर्ता से क्रमशः जल, पुष्प, अक्षतादि निम्न क्रमानुसार प्रदान करवाये :—

ॐ शिवा आपः सन्तु, ॐ सौमनस्यमस्तु, ॐ अक्षतं चाऽरिष्टं चाऽस्तु ।

जल, पुष्प और अक्षतादि अर्पण करवाने पश्चात् आचार्य पूजनकर्ता से सभी पितरों के निमित्त दाहिने हाथ के अँगूठे की तरफ से निम्न वाक्य द्वारा जलधारा अर्पण करवाये :—

ॐ अघोराः पितरः सन्तु ।

जलधारा प्रदान करवाने के पश्चात् आचार्य पूजनकर्ता से हाथ जुड़वाकर उसके पितरों की निम्न क्रमानुसार वन्दना करवाये :—

ॐ गोत्रन्नो वर्द्धतां दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च । श्रद्धा च नो मा व्यगमद् बहु देयं च नोऽस्तु ।

अन्नं च नो बहु भवेत् अतिथींश्च लभेमहि । याचितारश्च नः सन्तु मा च याचिष्म कञ्चन ।

एताः सत्या आशिषः सन्तु ।

वन्दना करवाने के पश्चात् आचार्य और पूजन स्थल पर उपस्थित ब्राह्मण पूजनकर्ता को निम्न वाक्य द्वारा आशीर्वाद अ.ंण करें :—

सन्त्वेताः सत्या आशिषः ।

आशीर्वाद देने के पश्चात् आचार्य पूजनकर्ता से विश्वेदेव सहित पितरों के निमित्त आँवला, मुनक्का, यव तथा आदी (अदरख) मूलादि अलग-अलग निम्न क्रमानुसार वितरण करवाये :—

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दी मुखाः ॐ भूर्भुवः स्वः कृतस्य नान्दी श्राद्धस्य फल प्रतिष्ठा सिद्ध्यर्थं द्राक्षा आमलक यव मूल निष्क्रयिणीं दक्षिणां दातुं अहं उत्सृजे। ॐ मातृ-पितामही-प्रपितामह्यः नान्दी मुख्यः ॐ भूर्भुवः स्वः कृतस्य नान्दी श्राद्धस्य फल प्रतिष्ठा सिद्-ध्यर्थं द्राक्षा आमलक यव मूलनिष्क्रयिणीं दक्षिणां दातुं अहं उत्सृजे । ॐ मातामह-प्रमातामह-वृद्ध प्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः कृतस्य नान्दी श्राद्धस्य फल प्रतिष्ठा सिद्ध्यर्थं

द्राक्षा आमलक यव मूल निष्क्रयिणीं दक्षिणां दातुं अहं उत्सृजे ।

नोट:—यदि सामग्रियों का किसी कारण से अभाव रहे तो पूजनकर्ता दक्षिणा वितरण कर दें !

ॐ उपास्मै गायता नरः पवमानायेन्दवे । ऊभि देवाँ२ ॥ इयक्षते । ॐ इडामग्ने पुरुदꣳ सꣳ सनिं गोः शश्वत्तमꣳ हवमानाय साध । स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमति-र्भूत्त्वस्मे ॥

दक्षिणादि प्रदान करने के पश्चात् पूजनकर्ता आचार्य तथा ब्राह्मणों से नान्दी श्राद्ध की सम्पन्नता हेतु निम्न वाक्य का उच्चारण करते हुए पूछे :—

अनेन किं नान्दी श्राद्धं सम्पन्नम् ? ।

तत्पश्चात् आचार्य तथा अन्य उपस्थित ब्राह्मण पूजनकर्ता से आनन्द पूर्वक निम्न वाक्य कहें :—

निश्चितं सुसम्पन्नम् ।

तत्पश्चात् आचार्य पूजनकर्ता से विश्वेदेवा सहित पितरों का विसर्जन निम्न वेदमन्त्रों द्वारा करवाये :

ॐ वाजेवाजेऽवत वाजिनो नो धनेषु विप्राऽ अमृता ऽऋतज्ञा: । अस्य मद्ध्व÷ पिबत माद-यद्ध्वं तृप्ता यात पथिभिर्देवयानैः ॥ १ ॥

ॐ आ मा वाजस्य प्रसवो जगम्या देमे द्यावा पृथिवी विश्वरूपे । आ मा गन्तां पितरा मातरा चा मा सोमोऽअमृतत्वेन गम्यात् ॥ २ ॥

ॐ विश्वेदेवाः प्रीयन्ताम् ।

विसर्जन के पश्चात् पूजनकर्ता आचार्य तथा ब्राह्मणों से निम्न वाक्य कहें :—

अद्य मया आचरिते साङ्कल्पिक नान्दी श्राद्धे न्यूनातिरिक्तो यो विधि: स उपविष्ट ब्राह्म-णानां वचनात् परिपूर्णोऽस्तु ।

पूजनकर्ता द्वारा कहे गये वाक्यों का प्रत्युत्तर आचार्य और ब्राह्मण निम्न वाक्य द्वारा दें :—

अस्तु परिपूर्ण: ।

-: इति नान्दी श्राद्धम् :-

❋ आचार्यादि वरणम् ❋

पूजनकर्ता अपने आचार्य को उत्तराभिमुख अथवा पूर्वाभिमुख आसन पर बैठाकर गन्ध-अक्षत् और पुष्पादि से आचार्य का पूजन करे तथा निम्न सङ्कल्प द्वारा आचार्य का वरण करे:—

ॐ अद्य अमुक गोत्रोत्पन्नः अमुक प्रवरान्वितः अमुकनाम शर्माऽहं अमुक गोत्रोत्पन्नं अमुक प्रवरान्वितं शुक्लयजुर्वेदान्तर्गत वाजसनेय माध्यन्दिनीय शाखाध्यायिनं अमुकशर्माणं ब्राह्मणं (आचार्य) अस्मिन् वास्तुशान्ति कर्मणि एभिः वरण द्रव्यैः आचार्यत्वेन त्वां अहं वृणे।

पूजनकर्ता से आचार्य निम्न वाक्य कहें :—

वृतोऽस्मि।

तत्पश्चात् पूजनकर्ता आचार्य को हाथ जोड़कर निम्न श्लोक द्वारा प्रार्थना करे :—

आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः।
तथा त्वं मम यज्ञेऽस्मिन् आचार्यो भव सुव्रत ! ॥

आचार्य प्रार्थना के पश्चात् पूजनकर्ता ब्रह्मा का वरण निम्न वाक्यों द्वारा करे :—

ॐ अद्य अस्मिन् वास्तुशान्ति कर्मणि एभिः वरण द्रव्यैः अमुक गोत्रं अमुक शर्माणं ब्राह्मणं त्वां अहं वृणे ।

तत्पश्चात् ब्रह्मा का वरण ग्रहण करने वाले ब्राह्मण को निम्न वाक्य कहना चाहिये :—

वृतोऽस्मि ।

तत्पश्चात् पूजनकर्ता ब्रह्मा को हाथ जोड़कर निम्न श्लोक द्वारा प्रार्थना करे :—

यथा चतुर्मुखो ब्रह्मा सर्वलोक पितामहः ।
तथा त्वं मम यज्ञेऽस्मिन् ब्रह्माभव द्विजोत्तम ! ॥

ब्रह्मा की प्रार्थना के पश्चात् पूजनकर्ता ऋत्विक् वरण निम्न वाक्य द्वारा करे और गन्धाक्षत्-पुष्पादि ब्राह्मणों के हाथों में प्रदान कर दे :—

ॐ अद्य अस्मिन् वास्तुशान्ति कर्मणि एभिः वरण द्रव्यैः अमुक गोत्रं अमुक शर्माणं ब्राह्मणं ऋत्विक्त्वेन त्वां अहं वृणे ।

तत्पश्चात् ऋत्विक् वरण ग्रहणकर्ता ब्राह्मण निम्न वाक्य कहें :—

वृतोऽस्मि ।

तत्पश्चात् पूजनकर्ता ब्राह्मणों को हाथ जोड़कर निम्न श्लोकों द्वारा प्रार्थना करे —

भगवन् सर्वधर्मज्ञ ! सर्वधर्म परायण ! ॥
वितते मम यज्ञेऽस्मिन् ऋत्विक्त्वं मे मखे भव ॥१॥

ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् । दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥२॥

तत्पश्चात् आचार्य पुनः दोनों हाथ जोड़कर आचार्य ब्रह्मा तथा अन्य वृणीत ब्राह्मणों की स्तुति निम्न श्लोक द्वारा करे :—

अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः ।
देवध्यानरताः नित्यं प्रसन्नमनसः सदा ॥
अदुष्टभाषणाः सन्तु मा सन्तु परनिन्दकाः ।
मयाऽपि नियमा ह्येते भवन्तु भवतामपि ॥
ऋत्विजश्च यथा पूर्वं शक्रादीनां मखेऽभवन् ।
यूयं तथा मे भवत ऋत्विजो द्विजसत्तमाः ॥
अस्मिन्कर्मणि ये विप्राः वृता गुरुमुखादयः ।
सावधानाः प्रकुर्वन्तु स्वं स्वं कर्म यथोदितम् ॥

अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया।
सुप्रसन्नैः प्रकर्तव्यं कर्मेदं विधिपूर्वकम् ॥
यथाविहितं कर्म कुरु (एकतन्त्रपक्षे-कुरुत) ।
विप्रः-यथाज्ञानं करवाणि (करवामः) ॥

—ः इति आचार्यादि वरणम् ः—

❀ रक्षा-विधानम् ❀

आचार्य बायें हाथ में पीली सरसों और तीन तार की मौली लेकर अपने दाहिने हाथ से ढँक कर निम्न श्लोकों का उच्चारण करें :—

ॐ गणाधिपं नमस्कृत्य नमस्कृत्य पितामहम् ।
विष्णुं रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम् ॥
स्थानाधिपं नमस्कृत्य ग्रहनाथं निशाकरम् ।
धरणीगर्भसम्भूतं शशिपुत्रं बृहस्पतिम् ॥
दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं महाग्रहम् ।
राहुं केतुं नमस्कृत्य यज्ञारम्भे विशेषतः ॥
शक्राद्याः देवताः सर्वाः मुनींश्चैव तपोधनान् ।
गर्गं मुनिं नमस्कृत्य नारदं मुनिसत्तमम् ॥

वशिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम् ।
व्यासं मुनिं नमस्कृत्य सर्वशास्त्रविशारदम् ॥
विद्याधिकाः ये मुनयः आचार्याश्च तपोधनाः ।
तान् सर्वान् प्रणमाम्येवं यज्ञरक्षाकरान् सदा ॥

इसके पश्चात् आचार्य निम्नमंत्र पढ़ कर, चारों ओर सभी दिशाओं में सरसों छिड़के :—

पूर्वे रक्षतु गोविन्दः आग्नेय्यां गरुणध्वजः ।
याम्यां रक्षतु वाराहो नारसिंहस्तुनैर्ऋते ॥
वारुण्यां केशवो रक्षेद्वायव्यां मधुसूदनः ।
उत्तरे श्रीधरो रक्षेदैशान्यांतु गदाधरः ॥
ऊर्ध्वं गोवर्धनो रक्षेदधस्ताच्च त्रिविक्रमः ।
एवं दशदिशो रक्षेद्वासुदेवो जनार्दनः ॥
शंखो रक्षेच्च यज्ञाग्रे पृष्ठे खड्गस्तथैव च ।
वाम पार्श्वे गदा रक्षेद्दक्षिणे तु सुदर्शनः ॥
उपेन्द्रः पातु ब्रह्माणमाचार्य्यं पातु वामनः ॥
अच्युतः पातु ऋग्वेदो यजुर्वेदमधोक्षजः ।
कृष्णो रक्षतु सामानि ह्यथर्वं माधवस्तथा ॥
उप विष्टाश्च ये विप्रास्तेऽनिरुद्धेन रक्षिताः ।

यजमानं सपत्नीकं कमलाक्षश्च रक्षतु ॥
रक्षा हीनं तु यत्स्थानं तत्सर्वं रक्षताद्धरिः ।
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा ॥
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ।
अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः ॥
ये भूताविघ्न कर्त्तारस्ते नश्यन्तु शिवाज्ञया ।
अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम् ॥
सर्वेषामविरोधेन शांतिकर्म्म समारभे ।
भूतप्रेतपिशाचाद्य स्त्वपक्रामन्तु राक्षसाः
स्थानादस्माद्व्रजन्त्वन्यत् स्वीकरोमि भुवमिमाम्

इति रक्षा विधानम्

❋ पञ्चगव्य करण ❋

तत्पश्चात् आचार्य गायत्री मन्त्र पढ़ करके गोमूत्र 'गन्ध द्वारा' इस मन्त्र से गोबर, 'आप्यायस्व' इस मन्त्र से दूध 'दधि क्राव्णों' इस मन्त्र से दधि, 'घृतं मिमिक्ष' इस मन्त्र से घृत 'आपो हिष्ठाः' इस मन्त्र से कुशोदक एक पात्र में लेकर 'प्रणव' का उच्चारण कर, यज्ञ काष्ठ से मिलावें और प्रणव मन्त्र से उसे अभिमन्त्रितकर 'आपो हिष्ठा' इस मन्त्र के द्वारा उसे सम्पूर्ण घर में छिड़के। तत्पश्चात् आचार्य इस मन्त्र का पाठ करे :—

स्वस्ति न ऽइन्द्रो व्वृद्धश्रवाः स्वस्ति नः पूषा व्विश्ववेदाः । स्वस्ति न स्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्द्दधातु ॥

इसके पश्चात् हवन के लिए आचार्य स्थण्डिल (यज्ञ वेदी) का निर्माण करें और उसे विविध रंगों से अलंकृत करे, इस यज्ञ वेदी के पूर्व में ग्रह वेदी तथा घर के ईशान भाग में वास्तु वेदी का निर्माण करे ।

इति पञ्चगव्य-करणम् ।

❋ अग्निस्थापनम् ❋

तीन कुशाओं से पश्चिम दिशा से पूर्व दिशा अथवा दक्षिण दिशा से उत्तर दिशा की तरफ तीन वार परिस मूहन कर उन कुशाओं को ईशान कोण में छोड़ दे । फिर जल मिश्रित गोबर लेकर उदक् संस्थ (दक्षिण से उत्तर) या प्राक् संस्थ तीन वार कुण्ड या वेदी का लेपन करे । फिर 'स्रुव' नामक यज्ञीय हवन करने वाले पात्र से प्रादेश प्रमाण या स्थण्डिल प्रमाण प्रागग्र पश्चिम दिशा से पूर्व दिशा की ओर छः छः अंगुल व्यवहित कर उल्लेखन-क्रम से अनामिका और अंगूठे से जहाँ रेखा दी है, उन रेखाओं से एक वार वहाँ की मिट्टी दाहिने हाथ में रख ईशान कोण में फेंक दे । मुष्टिकृत नीचे को हाथ कर जल से अभ्युक्षण कर बिना धूम वाली अग्नि को स्वाभिमुख मध्य में ही अग्नि कोण में रख वहीं पर आमाद और क्रव्याद

नामक दो अंगारों को त्याग अवशिष्ट अग्नि को मध्य में स्थापन करे। अर्थात् आमाद तथा क्रव्याद को स्थण्डिल के बाहर न न निकालें, इसके पश्चात आचार्य इस वैदिक मंत्र द्वारा अग्नि का स्थापन करवाये :—

ॐ अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे। देवाँऽआसादयादिह।

इति अग्निस्थापनम्

❀ [1]नवग्रह स्थापन एवं पूजन ❀

एक हाथ लम्बी और एक हाथ चौड़ी काष्ठ चौकी अथवा पीढ़े पर श्वेत वस्त्र बिछाकर आचार्य ग्रहमण्डल का निर्माण कर सूर्यादि ग्रहों का स्थापन एवं पूजनकर्ता से निम्नप्रकार पूजन करवायें: —

सूर्य:—

जपाकुसुम सङ्काशं काश्यपेयं महाद्युतिम्।
तमोऽरिं सर्वपापघ्नं सूर्यं आवाहयाम्यहम्॥

ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च।

हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥

१— ग्रहाणां पूजनं तत्र कारयेद्व्रदकोपरीति विश्वकर्मोक्तेः ग्रह तारा बलं लब्ध्वा ग्रह पूजा विधाय चेति मात्स्योक्तेश्चेति।

ॐ भूर्भुवः स्वः भो सूर्यः इहागच्छ इह तिष्ठ ॐ सूर्याय नमः, सूर्यं आवाहयामि स्थापयामि ।

सोमः

दधिशङ्खतुषाराभं क्षीरोदार्णव सम्भवम् ।
ज्योत्स्नापतिं निशानाथं सोमं आवाहयाम्यहम् ॥

ॐ इमं देवाऽअसपत्नठं० सुवद्ध्वं महते क्षत्राय महते ज्यैष्ठायाय महते जानराज्यायेन्द्रस्येन्द्रियाय । इममुमुष्य पुत्रममुष्यै पुत्रमस्यै विशाऽ एण वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाठं० राजा ॥

ॐ भूर्भुवः स्वः भो सोम ! इहागच्छ इह तिष्ठ ॐ सोमाय नमः, सोमं आवाहयामि स्थापयामि ।

भौमः—

धरणीगर्भ सम्भूतं विद्युत्तेजः समप्रभम् ।
कुमारं शक्तिहस्तं च भौमं आवहयाम्यहम ॥

ॐ अग्निर्मूर्द्धा दिवः ककुत्पति÷पृथिव्याऽ अयम् । अपाᳬरेताᳬसि जिन्वति ॥

ॐ भूर्भुवः स्वः भो भौम । इहागच्छ इह-तिष्ठ ॐ भौमाय नमः, भौमं आवाहयामि स्थापयामि

बुधः—

प्रियङ्गु कलिकामासं रूपेणऽप्रतिमं बुधम् ।
सौम्यं सौम्यगुणोपेतं बुधं आवाहयाम्यहम् ॥

ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टा-पूर्ते सꣳ सृजेथामयं च । अस्मिन्त्सधस्थे अद्ध्यु-त्तरस्मिन् विश्वेदेवा यजमानश्च सीदत ॥

ॐ भूर्भुवः स्वः भो बुधः इहागच्छ इह तिष्ठ ॐ बुधाय नमः, बुधं आवाहयामि स्थापयामि ।

गुरुः—

देवानां च मुनीनां च गुरुं काञ्चन सन्निभम् ।
वन्द्यभूतं त्रिलोकानां गुरुं आवाहयाम्यहम् ॥

ॐ बृहस्पते ऽअति यदर्योऽअर्हाद्युमद् विभाति क्रतु मज्जनेषु । यदीदयच्छवसऽऋतप्रजात तदस्मासु द्रविणं धेहि चित्रग ॥

ॐ भूर्भुवः स्वः भो गुरो । इहागच्छ

इह तिष्ठ ॐ गुरवे नमः, गुरू आवाहयामि स्थाप-यामि ।

शुक्रः—

हिमकुन्द-मृणालाभं दैत्यानां परमं गुरुम् ।
सर्वशास्त्र प्रवक्तारं शुक्रं आवाहयाम्यहम ॥

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः । ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धसऽइन्द्र स्येन्द्रियमिदं पयोऽ-मृत मधु ॥

ॐ भूर्भुवः स्वः भो शुक्र । इहागच्छ इह तिष्ठ ॐ शुक्राय नमः, शुक्रं आवाहयामि स्थापयामि ।

शनिः—

नीलाम्बुजन्समाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तण्ड-सम्भुतं शनिं आवाहयाम्यहम् ॥

ॐ शंनो देवी रभिष्टयऽ आपो भवन्तु पीतये ।
शं यो रभिस्रवन्तु नमः ॥

ॐ भूर्भुवः स्वः भो शनैश्चरः । इहागच्छ

इहतिष्ठ ॐशनैश्चराय नमः, शनैश्चरं आवाहयामि स्थापयामि ।

राहुः –

अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् ॥
सिंहिका-गर्भ सम्भूतं राहुं आवाहयाम्यहम् ॥

ॐकया नश्चित्रऽआभुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥

ॐ भूर्भुवः स्वः भो राहो ! इहागच्छ इह तिष्ठ ॐ राहवे नमः, राहु आवाहयामि स्थापयामि ।

केतुः –

पालाश-धूम्र-सङ्काशं तारकाग्रह-मस्तकम् ।
रोद्रं रौद्रात्मकं घोरं केतु आवाहयाम्यहम् ॥

ॐ केतुं कृण्वन्न केतवे पेशो मर्याऽअपेशसे। सभुषद्भि रजायथाः ॥

ॐ भूर्भुवः स्वः भो केतो । इहागच्छ इह तिष्ठ ॐ केतवे नमः, केतुं आवाहयामि स्थापयामि ।

इस प्रकार से आचार्य ग्रहों की स्थापना करवाये और शोडशादि यथोपलब्ध उपचारों से पूजन कर्ता से पूजन करवाये ।

इति नवग्रह स्थापन एवं पूजनम्

❀ असंख्यात् रुद्रपूजनम् ❀

कलश स्थापन विधि से आचार्य असङ्ख्यात रुद्र कलश की स्थापना करे, पूजन कर्त्ता अर्थात् (यजमान[1])से निम्नश्लोक और मन्त्र से रुद्र का ध्यान करवाये:—

रुद्रध्यान:—

पञ्चवक्त्रं वृषारूढमुमेश च त्रिलोचनम् ।
आवाहयामिश्वरं तं खट्वाङ्गवरधारिणम् ॥

ॐ त्र्यम्बकं यजामहे सुगन्धि पुष्टि वर्द्धनम् ।
उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय माऽमृतात् ।

ॐ भूर्भुवः स्वः हे रुद्र इहागच्छ इह तिष्ठ
ॐ रुद्राय: नमः रुद्रं आवाहयामि स्थापयामि ।

इस प्रकार आचार्य आवाहन व स्थापन करवाये, फिर यथा विधि निम्न श्लोकों से रुद्र का पूजन पूजनकर्ता से क्रमानुसार करवाये:—

ध्यानम्: —

वृष वाहन ! सर्प-भूषण ! डमरू-बादक ! शुल-धारक ।
संततं हृदि चिन्तयामि त्वामयि गङ्गाधर!चन्द्रशेखर ॥

---

१ —दानवाचण्यान्वारम्भण वर वरण व्रत प्रमाणेषु यजमानं प्रतीया- दिति सूत्रार्कः ।

आवाहनम्:—

क्रियते करुणा निधे ! विभो ! गिरिशाऽवाहन-मद्यते मयाभगवन्निज-पाद-पङ्कजैः कुरू पूतं मम् सद्मपावनैः ॥

आसनम्:—

अयि रुद्र ! सुसज्जितं मयातव हेतोरिदमद्य-वासनम् ।
करूणेश गृहाण वर्धय निज-दासस्य-यशो-वितानकम्

पाद्यम्:—

अयि पाद्यमिदं प्रदीयते बहुभीतेन मया दयानिधे ।
करुणां कुरु गृह्यतांमिदं शिव!दूरी कुरू मामकं भयम्॥

अर्ध्यम्:—

करुणा यदि नाथ ते मयि यदि श्रद्धार्पितमेव गृह्यते ।
पुनरीश ! विलम्ब्यते कथं कथमर्घ्यन्त ममाद्य गृह्यते॥

आचमनीयम्:—

गिरिशोपहरामिते पुरो निजभक्त्या परिपूरितंसुद्रा ।
इदमाचमनीयमीश्वर ! करुणा दर्शय गृह्यतां प्रभो !॥

दक्षिणा:—

सर्वं त्वदियं मम् नास्ति किञ्चिद ।
ददामि किंम ते वद दक्षिणायां ॥

तथापि देवेश ! मयार्पितं त्वं।
स्वकीय मेवाद्य गृहाण नाथ ! ॥

नीराजनाः—

दयानिधिं वेत्ति न को जगत्यां।
लम्बोदरं त्वा वद दीन-बन्धो ! ॥
अजानताऽर्चा सरणीं मयाऽपि।
नीराजनाऽतः किल कल्प्यते ते ॥

परिक्रमाः—

पुनाति विश्वं हि परिक्रमा।
ते सुरा सुरैरर्चितपादपद्म ! ॥
अतो दया नाथ ! यथाविधं तां।
करोमि भक्त्यानत-मस्तकोऽहम् ॥

स्नानम्:—

मया ते प्रियं संभृतं गाङ्गमीश ! जलं पूत-पूतं त्वदर्थं त्रिनेत्र। प्रसीद प्रभो ! जटा जूट धारिन् ! कुरु स्नानमीशान ! देवाधिदेव ! ॥

मधुपर्कः—

अयि दैयामय ! देव ! समर्प्यते शिव ! हरे !

मधुपर्कलवस्त्व । पतितपावन ! पावन-पादयोरनु-गृहाण जपं कुरु मे विभो ! ॥

कुंकुमम्:--

श्रुतस्त्वं मयादीन बन्धुर्दयालुस्तथा चाशु-तोषः पुनःको विलम्बः । मया भक्तियुक्तेन दानेन दत्तं गृहाणाधुना कौङ्कुमं चूर्ण मेतत् ॥

धूपः —

इदं गन्धयुकं विभो ! धूपाजलं त्वदर्थं मया संभृतं किं नवाऽलम् । यदि स्यादिदं स्वीकृतं ह्याशुतोषं । यथार्थ भवेन्नाम् ते दीनबन्धो ! ॥

दीपः —

प्रदीपायसे त्वं जगत्यां दयालो ! प्रदीपः पुरस्ते ।
न शोभां दधाति विलोक्येश ॥
लोकस्य रीतिं तथापि महादेव ।
दीपं पुरस्ते अपर्यामि ॥

नैवेद्यम्: —

शर्कराघृतसंयुक्तं मधुरं स्वादु चोत्तमम् ।
उपहारसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥

ताम्बूलम्ः—

पूगीफलं महाद्दिव्यं नागवल्लीदलैर्युत्तम् ।
एलादि चूर्णादि संयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

दक्षिणाः—

त्व मेवासि दाता विधाता दयालु दर्दामीश ! किं दक्षिणा व्याजतोऽहम् तथापीश ! मत्वा स्व-दासार्पितां तामिमां दक्षिणां दीनबन्धो ! गृहाण ॥

आरतीः—

कर्पूर गौरं करुणावतारं, संसारसारं भुजगेन्द्र हारम् । सदा वसन्तं हृदयारबिन्दे, भवं भवानी सहितं नमामि ॥

पुष्पाञ्जलिः—

पुष्पविना मयि दयामव ! नास्ति किञ्चिद् दीनो ऽस्मि त्वं शरणोऽसि च माहशानाम् ।
कृत्वा महेश ! करुणामत एव दीने पुष्पाञ्जलि मम गृहाण दया विधातः ! ॥

प्रार्थनाः—

दीनं ज्वलन्मम मनो विषयाग्नि कुण्डे आकारयत्यतितमां किल दीनबन्धुम् ।

त्क्तोऽपरं कथय कं परमेश्वरं हा ! पायाद दयामय ! विभो ! शिव ! शूलधारिन !

इति रुद्र पूजनं समाप्त

❋ वास्तु वेदी-पूजनम् ❋

ग्रह पूजन और असंख्यात रुद्र का पूजन करवाने के पश्चात् आचार्य वास्तु वेदी के समीप आकर, वास्तु मण्डल के कोणों में ईशानादि क्रम से सकुओं का आरोपण करें।

शंकुरोपण मन्त्रः—

विशन्तु भूत लेनागा लोक पालाश्च सर्वतः।
अस्मिन गृहे ऽवतिष्ठन्तु आयुर्वल करा सदा॥

तत् पश्चात् रोपित सङ्कुओं के पास ईशानादि क्रम से ही ही दही उड़द और भात (चावल) की बलि रखें,

बलि देने का मन्त्रः--

ॐ अग्निभ्यो ऽप्यथ सर्पेभ्यो ये चान्येतान् समाश्रिताः।
बलिं तेभ्यः प्रयच्छामि पुण्य मोदन मुत्तमम्॥

इसके पश्चात् वेदी के ऊपर बिछे हुए वस्त्र कुंकुमादि से स्वर्ण की शलाका से पूर्व-पश्चिम, उत्तर, दक्षिण की ओर दस-दस रेखायें बनावें।

पुनः ईशान कोण वाले पद से आरम्भ कर शिल्यादि देवताओं का वास्तु मंण्डल में स्थापन करेः—

ॐशिखिने नमः शिखिनम् आवाहयामि स्थापयामि।
ॐपर्जन्याय नमः पर्जन्याय आवाहयामि स्थापयामि।
ॐजयन्ताय नमः जयन्तम् आवाहयामि स्थापयामि।
ॐकुलिशायुधायः कुलिशायुधायं
आवाहयामि स्थापयामि।
ॐ सूर्याय नमः ॐसूर्यम् आवाहयामि स्थापयामि।
ॐ सत्याय नमः सत्यम् आवाहयामि स्थापयामि।
ॐ भृशाय नमः भृशम् आवाहयामि स्थापयामि।
ॐ वायवे नमः वायुम् आवाहयामि स्थापयामि।
ॐ पूष्णे नमः पूष्णम् आवाहयामि स्थापयामि।
ॐवितथायनमः वितथम् आवाहयामि स्थापयामि।
ॐ गृहत्क्षताय नमः गृहत्क्षतम्
आवाहयामि स्थापयामि।
ॐयमायनमःयमम् आवाहयामि स्थापयामि।
ॐगन्धर्वाय नमः गन्धर्वम् आवाहयामि स्थापयामि।
ॐ भृंगराजाय नमःभृगराजम् आवाहयामि
स्थापयामि।

ॐ मृगाय नमः मृगम् आवाहयामि स्थापयामि ॥

ॐ पितृभ्योनमः पितृण् आवाहयामि स्थापयामि ।

ॐ दौवारिका नमः दौवारिकम् आवाहयामि स्थापयामि ।

ॐ सुग्रीवाय:नमःसुग्रीवम् आवाहयामि स्थापयामि ।

ॐ वरुणाय नमः वरुणम् आवाहयामि स्थापयामि ।

ॐ पुष्पदन्ता नमः पुष्पदन्तम् आवाहयामि स्थापयामि ।

ॐ असुराय नमः असुरम् आवाहयामि स्थापयामि ।

ॐ शोषाय नमः नमः शोषम् आवाहयामि स्थापयामि ।

ॐ पापाय नमःपापम् आवाहयामि स्थापयामि ।

ॐ रोगाय नमः रोगम् आवाहयामि स्थापयामि ।

ॐ अहये नमः अहिम् आवाहयामि स्थापयामि ।

ॐ मुख्याय नमः मुख्यम् आवाहयामि स्थापयामि ।

ॐ भल्लायम् नमः भल्लाम् आवाहयामि स्थापयामि ।

ॐ सोमाय नमः सोमम् आवाहयामि स्थापयामि ।

ॐ सर्पाय नमः सर्पम् आवाहयामि स्थापयामि ।

ॐ आदित्यै नमः आदित्यम् आवाहयामि
स्थापयामि ।
ॐ दित्यै नमः दितिम् आवाहयामि स्थापयामि ।
ॐ मित्राय नमः मित्राम् आवाहयामि स्थापयामि ।
ॐ राजयक्ष्मणे नमः राजयक्ष्मणम्
आवाहयामि स्थापयामि ।
ॐ पृथ्वीधराय नमः पृथ्वीधरयै
आवाहयामि स्थापयामि ।
ॐ आपवत्साय नमः आपवत्सम्
आवाहयामि स्थापयामि ।
ॐ ब्रह्मणे नमः ब्रह्माणं आवाहयामि स्थापयामि ।
ॐ विदार्यै नमः विदार्यं आवाहयामि स्थापयामि ।
ॐ पूतनायै नमः पूतनायं आवाहयामि स्थापयामि ।
ॐ पापराक्षस्यै नमः पापराक्षस्मि आवाहयामि
स्थापयामि ।
ॐ स्कंदाय नमः स्कंदम्यै आवाहयामि स्थापयामि ।
ॐ अर्यम्णेनमः अर्यम्णं आवाहयामि स्थापयामि ।
ॐ जृंभकायनमः जृंभकम् आवाहयामि स्थापयामि ।

ॐ पिलिपिच्छायनमः पिलिपिच्छाम् आवाहयामि
स्थापयामि ।

ॐ उग्रसेनाय नमः उग्रसेनं आवाहयामि
स्थापयामि ।

ॐ डामराय नमः डामरं आवाहयामि
स्थापयामि ।

ॐ कालाय नमः कालं आवाहयामि स्थापया म ।

ॐ एकपदे नमः एकपदं आवाहयामि स्थापयामि ।

इस प्रकार से वास्तु मंडलस्थ देवताओं का आवाहन और स्थापन करके, निम्न श्लोकों के द्वारा आचार्य पूजनकर्ता से वास्तु मंडलस्थ देवताओं का पूजन करवाये:—

आवाहनः—

समस्तप्रत्यूहसमुच्चयस्य विनाशकाः
श्री प्रदवास्तु देवाः ।
आवाहनं वो वितनोमि भक्त्या
शिल्यादिका भव्यकरा भवन्तु ॥

आसनः—

चित्र प्रभाभासुरमच्छ शोभं
मयार्पितं शोभित मासनं च ।

शिख्यादिका भव्यकरा भजन्तु
भवन्तु मेऽभीष्टकराः सहाङ्गै ॥

पाद्यम्:—

कस्तुरिका सुरभि चन्दन युक्त
मेला चम्पाल वङ्गघनसार सुवासितं च ।
पाद्यं ददामि जगदेकनिवास वास्तु-देवाः
सदा सुखकराः प्रतिमानयन्तु ॥

अर्घम्:—

सौजन्य सौख्य जननी जननी जनानां
येषां कृपैव वसुधा वसुधारिणी मे ।
ते सर्व देवगुण पूरित वास्तु देवा अर्थ
सुखेन विमलं मम धारयन्तु ॥

आचमनीय:—

कङ्कोल पत्र चरि चन्दन पुष्पयुक्त
मेलाल वङ्गलवली घनसार सारम् ।
दत्तं सदैव हृदये करुणाशयेऽस्मिन देवा
भजन्तु शुभ माचनीयमम्भः ॥

पञ्चामृत स्नानः—

विमलगाङ्ग जलेन युतं पयो

घृतासितादधिसर्पि रूपान्वितम् ।
प्रियतरं भवतां परि गृह्यत यदि
कृपा भवतां मयि सेवके ॥

शुद्धोदक स्नानं:—

जले समादाय विचित्र पुष्पाण्यच्छानि
नव्यानि निपातितानि ।
स्नानं विधेयं विबुधाः
समन्तादागत्य युष्माभि रिहाङ्गणे ॥

वस्त्रः

अनर्घ्य रत्नै रति भासितानि
चेतोहराण्यद्‌भूत चिन्तितानि ।
शुभानि वस्त्राणि निवेदितानि
गृह्यन्तु हार्देन च वास्तुदेवाः ॥

यज्ञोपवितः

कोशेयसूत्र विहितं विमलं सुचारु
वेदोक्त रीति विहितं परिपावनं च ।
साङ्गा निवेदितमिदं लघु वास्तुदेवा
यज्ञोपवीत मुररी क्रियतां प्रसन्नाः ।

उपवस्त्रं:—

त्रिविधताप विनाश विचक्षणाः
परम भक्ति युतेन निवेदितम् ।
सुरनुता उप वस्त्र मिदं नवं सुरभितं
परिगृह्णत मेऽधुना ।

गन्धं:—

शिख्यादयो मलयजात सुगन्धराशिं
सप्रेम गृह्यतः सुशीतलमच्छशोभम् ।
सन्तापविस्तृतिहरं परम् पवित्रं द्रागर्पितं
मम् मनोरथ पूरकाः स्युः ।

अक्षत: -

शिख्यादयः केसर कुंकुमाक्तान्
भक्तया मया स्नेह समर्पितांश्च ।
गृह्णन्तु देवा द्रुतमक्षतान्मे
सर्वान्तरायान् विनिवर्तयध्वम् ॥

पुष्पं:—

बहुविधं परितो हि समाहृतं
समुचितं मकरन्दसमान्वितम् ।

विकसितं कुसुमं विनिवेदितं
कुरुत मे सफलं नयनाञ्चलैः ।

मौलीः—

सौभाग्य सौन्दर्य विवर्द्धनानि
शोणश्रियाऽऽनन्द विवर्धनानि ।
श्री रक्तचूर्णानि मयाऽर्पितानि
शिख्यादयोगृह्यतः वास्तु देवाः ॥

धूपं:—

लवङ्ग पाटीर सुगन्ध पूर्ण नरा
सुराणामपि सौख्यदं च ।
लोकत्रये गन्धमयं मनोज्ञं
गृह्यन्तु धूपं मम वास्तु देवाः ॥

दीपं:—

सद्वर्तिको घोर तमो पहन्ता
दीपो मया सत्वर मर्पितो वः ।
प्रज्वालितो वह्निशि खासमेतः
शिख्यादयो वेदविधानयुक्तः ॥

नैवेद्यः—

सिद्धान्नकर्पूर विराजमानं
सौरभ्यसान्द्रेण सुशोभमानाम् ।
नैवेद्य मेतस्सर सं पवित्रं स्त्रीकृत्य
मामत्र कृतार्थ यन्तु ॥

ताम्बूलः—

शिख्यादिकाः खलु समेत्य गृहं मदीयं
भक्त्यार्पितं परमगन्धयुतं सुरम्यम् ।
एलालवङ्ग बहुलं क्रमुकादियुक्तं
ताम्बूलकं भजत मंडपवास्तु देवाः ॥

दक्षिणाः—

देवासुरै नित्यमशेषकाले
प्रगीयगानाः प्रभवः पुराणाः ।
गृह्णन्तु सद्यः खलु दक्षिणां मे
ध्यानेन भक्ते मयि वर्तितव्यम् ॥

आरतीः—

नीराजना सौख्य मयी सदैव
गाढ़ान्ध कारानपि दूरकर्त्री ।
अशेषपापैः परिपूरितस्य शुद्धिं
करोति प्रिय मानवस्य ॥

प्रदक्षिणाः—

प्रदक्षिणाः सन्ति प्रदक्षिणा स्तथा
पदे पदे दुखविनाशिका अपि।
जन्मान्तरस्यापि विनाश कारिकाः
पापस्य याश्चित्त विवर्धितस्य ॥

पुष्पाञ्जलिः—

शिख्यादिका में खलु वास्तु देवा
गृह्णन्तु पुष्पांजलि मंत्र शीघ्रम्।
पीडा हरा भव्यकरा विशाला
भवन्तु भूयालन तत्पराश्च ॥

स्तुतिः—

जानामि नोऽर्चन विधिं परमं क्षमध्वं
लोकार्तिं पुञ्जमतुलं क्षपयन्तु नित्यम्।
शिख्यादिकाः सुविमलाः सुखमाकिरन्तु
कुर्वन्तु दूरमनिशं दुरितान् समन्तात् ॥

तत् पश्चात वास्तु मंडल के पूर्वादि अष्ट दिशाओं में इन्द्रादि देवताओं की स्थापना करे और वास्तु मण्डल के मध्य में कलश स्थापित कर उस कलश पर स्वर्णमयी दो प्रतिमाएँ जिनमें एक प्रतिमा वृष वास्तु की तथा द्वितीय प्रतिमा वास्तो-

स्थापित की होगी। उन्हें स्थापित करें। और निम्न मन्त्र से आचार्य उन मूर्तियों में देवता का आवाहन कर पूजन करें।

वास्तु देवता मन्त्र

ॐ वास्तोष्पते प्रतिजानी ह्यस्मान
स्वावेशो अनमी वो भवानः।
यत्वे महे प्रतितन्नो जुषश्व शन्नोभव
द्विपदे शंचतुष्पदे स्वाहा॥

इसके पश्चात आचार्य वास्तु मंडल से ईशान कोण में एक कलश स्थापित कर पूजन कर्ता से वरुण का पूजन करावें।

इति वास्तुवेदी पूजनम्

❋ कुशकण्डिका ❋

अग्नेर्दक्षिणतो ब्रह्मासनम्। अग्नेरुत्तरतः प्रणीतासनद्वयम्। ब्रह्मासने ब्रह्मोपवेशनम्। यावत्कर्म समाप्यते तावत्त्वंब्रम्हा भव 'भवामि' इति

ब्रह्मा के आसन पर ब्रह्मा को बैठा दे कहे हें ब्रह्मन जब तक कर्म की समाप्ति न हो तब तक आप ब्रह्मा पद पर आसीन हो। ब्रह्मा–मैं होता हूँ यो कह कर पूर्व स्थापित आसन पर

पठित्वा तत्रोपवेशनम् । 'भत्रामि' इति ब्रम्हणः प्रत्युक्तिः । ब्रम्हा वाग्यतश्च भवेत । ततः प्रणीतापात्रं सव्यहस्ते धृत्वा दक्षिणहस्तगृहीतेनोदकपात्रेण तत्र जलं सम्पूर्य पश्चादास्तीर्णकुशेषु दक्षिणहस्तेन निधाय (कुशैराच्छाद्य तत्पात्रमालभ्य ब्रम्हणोमुख मवलोक्य ईक्षणमात्रेण ब्रम्हणाऽनुज्ञातः—उत्तरत आस्तीर्णेषु कुशेषु निदध्यात् । ततो द्वादशानां परिस्तरण कुशानां चतुरो भागान् वामहस्तेकृत्वा एकैकभागेन आग्नेयादीशानान्तम्,ब्रह्मणोऽग्निपर्यतम् , नैर्ऋत्याद्वाय-

---

बैठे, तदनन्तर ब्रह्मा मौन हो जाये, फिर प्रणीता पात्र को बायें हाथ में धारण कर दाहिने हाथ से ग्रहण किये हुए, जलपात्र से उस प्रणीता पात्र में जल को भर के पहले से बिछी हुई कुशाओं पर दाहिने हाथ से रखकर (कुशो द्वारा आच्छादन कर) उस पात्र को स्पर्श कर ब्रह्मदेव के मुख को देखकर ईक्षण मात्र से ब्रह्मा की आज्ञा लेकर उत्तर दिशा की ओर बिछी कुशाओं पर रख दे, तदनन्तर बारह परिस्तरण कुशाओं के चार भागों को बायें हाथ में रख उसमें से एक-एक भाग से परिस्तरण अग्निकोण से ईशानादि में करे। तदनन्तर-पश्चिम

व्यान्तम्, अग्नितः प्रणीतापर्यन्तम्। इतरथा वृत्तिः। तत उत्तरतः स्तीर्णकुशेषुद्विशः पात्राणि यथासम्भवं न्युब्जानि उदक्संस्थानि प्राक्संस्थानि वा सादयेत्। पवित्रे छेदनकुशाः। प्रोक्षणीपात्रम् आज्यस्थाली। चरुस्थाली। संमार्जनकुशाः पञ्च: उपयमनकुशाः सप्त। समिधस्तिस्रः। स्रुवः। आज्यम्। तण्डुलाः। पूर्णपात्रम्। उपकल्पनीयानि तत्तद्ग्रहवस्त्राणि। अधिदेवताद्यर्थं श्वेतानि। तत्तद्ग्रहचन्दनानि। अक्षतास्तद्ग्रहवर्णाः। तत्तद्ग्रहपुष्पाणि। तत्तद्ग्रहधूपाः। तत्तद्ग्रहनैवे-

---

दिशा से उत्तर की ओर बिछी कुशाओं पर दो-दो पात्रों को यथा सम्भव न्युब्ज-उदक् संस्थ या प्राक् संस्थ आसादन करे, दो पवित्र छेदन करने के लिए कुशा प्रोक्षणीपात्र आज्यस्थाली, चरुस्थाली, संमार्जन कुशा पाँच, उपयन कुशा सात, तीन समिधा, स्रुव-घृत-चावल पूर्णपात्र-सूर्यादि ग्रहों के अनेक वर्ण के वस्त्र-अधिदेवता, देवता आदि के लिये सफेद वस्त्र, सूर्यादि ग्रहों के लिए अनेक प्रकार के चन्दन, तत्-तत् वर्ण के ग्रहों की धूप, ग्रहों के नैवेद्य-फल-दक्षिणा वितान सूर्यादि की समिधा यव और तिल, पूर्णाहुत्यर्थं नारिकेल और वस्त्र। तदन्तर

द्यानि। फलानि। दक्षिणाः। वितानम्। अर्का-दिसमिधः। सय वतिलाः। पूर्णाहुत्यर्थं नारि-केलवस्त्रादि। ततः पवित्र करणम्। तद्यथा-आसादितं कुशपत्र द्वयं स्थौल्येन समं मध्यशल्य रहितं। वामहस्ते कृत्वा अग्रतः प्रादेशमात्रं परि-माय मूले तयोरुपरि कुशात्रयमुदगग्रं निधाय तत्कुशत्रयं तयोर्मूलभागेनप्रदक्षिण्येन परिवेष्ट्य तयोः प्रादे शपरि माणमग्रभागं वामस्ते कृत्वा अवशिष्टं मूलभागंकुशत्रयं च दक्षिणहस्ते धृत्वा दक्षिणहस्तेन त्रोटयेत् परित्यजेच्च। शिष्टं पत्रद्वयं

पवित्र बनावे जैसे—स्थापित मध्य (वीच कुशा से रहित) शल्य रहित दो कुश पत्र द्वय को वरावर नापकर वायें हाथमें कर कुशा के अग्रभाग से प्रादेश मात्र नापकर उसके मूल पर उन दोनों कुशा के ऊपर तीन कुशाओं को उदगग्र रखकर उन कुशाओं को उस दो कुशा के मूल भाग से प्रादक्षिण्य क्रम से वेष्टन कर उन दो कुशपत्रों को प्रादेश मात्र परिमाण के अग्रभाग को बाये हाथ में कर वचे हुए मूल भाग को और तीन कुशाओं को दाहिने हाथ में धारणकर दाहिने हाथ से तोड़ दें। और त्याग दें, शिष्ट पत्र द्वय ही पवित्र हैं। उस

पवित्रम् । तस्मिन्पत्र द्वयेऽविश्लेषाय ग्रथिं कुर्यात। ततः प्रागग्रंप्रोक्षणीपात्रं प्रणीतासन्निधौनिधाय तत्र-सपवित्रेण पात्रान्तरेण हस्तेन वा प्रणीतोदकं त्रि-रासिच्यप्रोक्षणीपात्रं सव्ये कृत्वा दक्षिणेन वाम हस्तधृतमेवकर्णसमुत्थाय नीचैः कृत्वा प्रणीतोदकेन पवित्रानीतेनोत्तान हस्तेन प्रोक्षणीः प्रोक्षयेत् । ततः प्रोक्षणी जलेनआज्यस्थाली प्रोक्षणम् । चरु-स्थालीं, प्रोक्षणम् । समांर्जन कुशानां प्रोक्षणम् । उपयमकुशानां प्रोक्षणम् । समिधांप्रोक्षणम । स्रु-वस्य प्रोक्षणम् । आज्यस्य प्रोक्षणम् । पूर्णपात्रस्य

पत्र द्वय में अविश्लेषण के लिए गाँठ दें । तदनन्तर प्रागग्र प्रोक्षणीपात्र को प्रणीता के समीप रख वहाँ से सपवित्र पात्रान्तर हाथ से प्रणीता पात्र के जल को तीन वार आसेचन कर प्रोक्षणी पात्र को वायें हाथ में कर दाहिने से वाये हाथ से धारण किये हुए ही कान की तरफ उठाकर नीचे की तरफ कर प्रणीता पात्र के जल से पवित्र द्वारा ग्रहण किये हुए, उत्तान हाथ से प्रोक्षणी पात्र का प्रोक्षण करें । प्रोक्षणी जल से आज्यस्थाली का प्रोक्षण करें । चरुस्थाली का प्रोक्षण करे । संमार्जन कुशाओं का प्रोक्षण करे । उपयमन कुशाओं का, समि-

प्रोक्षणम् । ततस्ते पवित्रे प्रोक्षणी पात्रे संस्थाप्य प्रोक्षणीपात्रमग्नि प्रणीतयोर्मध्ये निदध्यात् । ततोऽग्नेः पश्चादाज्यस्थालीं निधाध तत्राज्यं प्रक्षिपेत् एवं चरुस्थाली मग्नेः पश्चिमतो निधाय तत्र सप वित्रायां त्रिः प्रक्षालितान् तण्डुलान प्रक्षिप्य प्रणीतोदकमा सिच्योपयुक्तं जले तत्र निनीय ब्रम्हदक्षिणतआज्यम् आचार्य उत्तरतश्चरुमदग्ध-मस्रावितमण्डमन्तरुष्मापवक्कसुश्रृतंपचेत् । (केवला-ज्ये तु उत्तराश्रितामाज्यस्थालीमग्ना वारोपयेत्) । ततोऽग्नेर्ज्वलदुल्मुकमादाय ईशानादि प्रदक्षिणामी

घी का, स्रुवका आज्य का और पूर्ण पात्र का प्रोक्षण करे । तदनन्तर उन दोनों पवित्रों को प्रोक्षणी पात्र में स्थापन कर उस प्रोक्षणी पात्र को अग्नि और प्रणीतापात्र के मध्य में रख दे । फिर अग्नि के पीछे आज्य स्थायी रख उसमें आज्य का प्रक्षेप करें । इसी प्रकार अग्नि के पश्चिम् चरुस्थाली रख सप-वित्रवाली उसमें तीन वार धाये हुए चावलों का छोड़ प्रणीता-पात्र के जल से आसेचन कर उपयुक्त जल को उसमें छोड़कर ब्रह्मा के दक्षिण तरफ घी को आचार्य उत्तर दिशा से अदग्ध अस्रावित पक्व चरु को पका दे । तदनन्तर अग्निकुंड या

शान पर्यन्तमग्निमाज्यचर्वोः परितं भ्रामयित्वोल्मुकमग्नौ प्रक्षिप्य अप्रदक्षिणं हस्तमीशानकोणापर्यन्तं पर्यावर्तयेत। अर्द्धश्रिते चरौ स्रुवं गृहीत्वाऽधोबिलं सकृत प्रतप्य संमार्जनकुशानामग्रै रन्तरतः— उपरि मूलादारभ्याग्रपर्यन्तं प्राञ्चं संमृज्य कुश मूलैर्बहिरधः प्रदेश अग्रादारभ्य प्रत्यञ्चं सम्मृज्य संमार्जन कुशानग्नौ प्रक्षिप्य प्रणीतोदकेन स्रुवमभ्युक्ष्य पुनः स्रुवं प्रतप्य दक्षिणस्यां दिशि तं

स्थण्डिल से जलते हुए, उल्मुक को लेकर ईशान आदि से प्रदक्षिण ईशान पर्यन्त अग्नि स्थित आज्य और चरू के चारों तरफ घुमकर उस उल्मुक को अग्नि में छोड़ दे। फिर अप्रक्षिण क्रम से अपने हाथ को ईशान कोण पर्यन्त घुमा दे। चरू के आधे पक जाने पर स्रुव को हाथ में ग्रहण कर उस स्रुव के बिल को नीचे की तरफ कर एक वार अग्नि में तपाकर संमार्जन कुशाओं के अग्रभाग से भीतर की तरफ से मूलभाग से आरम्भ कर अग्र भागपर्यन्त पूर्व की तरफ संमार्जन कर कुश मूलों से बाहर और नीचे के हिस्से में अग्रभाग से आरम्भ कर शुद्ध कर संमार्जन कुशाओं को अग्नि में फेंककर प्रणीता जल से स्रुव का अभ्युक्षण तथा स्रुव का प्रतपन कर दक्षिण दिशा की तरफ उस स्रुव को रख दे।

स्थापयेत्। ततः शृतं चरुं स्रुवेण गृहीतेनाज्ये-नाभिघार्य आज्यस्थालीं चरोः पूर्वेणानीयोत्तरत उद्वास्याग्नेः पश्चिमतः स्थापयेत्। ततश्चरुमादाय उत्तरत उद्वास्य आज्यस्य पूर्वेणानीय आज्यस्योत्त रतः स्थापयेत्। ततो दक्षिणहस्तस्याङ्गुष्ठानामि काभ्यां पवित्रयोर्मूलं सङ्गृह्य वामहस्तस्याङ्गुष्ठानामि काभ्यां तयोरग्रं संङ्गृह्य ऊर्ध्वाग्रेऽनम्रीकृत्यधारयन्ने वाज्ये प्रक्षिप्याज्यस्योत्पवनं कुर्यादुच्छालयेत्।

तदनन्तर पके हुए चरू में स्रुव के द्वारा घी को छोड़ आज्यस्थाली को चरू के पूर्व से ले आकर उत्तर दिशा की तरफ रख फिर अग्नि के पश्चिम दिशा की तरफ स्थापन करे। फिर चरू को लेकर उत्तर दिशा से उतारे हुए घी के पूर्व से ले आकर घी के उत्तर की तरफ स्थापन करे।

तदनन्तर—दाहिने हाथ के अंगूठे और अनामिका से उस दोनों कुशाओं (पवित्र) के अग्रभाग को पकड़कर ऊपर के अग्रभाग को नम्र बनाकर धारण करते हुए ही आज्य (घी) में प्रक्षेप कर आज्य को उत्पवन करें। फिर घी को देख कर उसमें अपद्रव्य हो उसे निकाल दे। तदनन्तर फिर पवित्रों को ग्रहण कर प्रोक्षणी स्थित जल को उत्पवन करे फिर बाये हाँथ

तत आज्यमवेक्ष्य सत्यपद्रव्ये तन्निरस्येत्। ततः पूर्ववत्पवित्रे गृहीत्वाप्रोक्षणीनामपामुत्पवनं कुर्यात्। ततो वामहस्ते उपयमनादाय दक्षिणेन प्रादेशमात्रीः पालाशी स्विस्त्रः—समिधो घृताक्ता द्व्यङ्गुलादूर्ध्वं मध्यमानामि कांगुष्ठैर्मूलभागे धृतास्तर्जन्यग्रवत्स्थूलास्तन्त्रेणाग्नौतूष्णीं प्रक्षिप्य सपवित्रेण प्रोक्षण्युदकेन चुलुकगृहीतेन ईशानादि प्रदक्षिणमीशान कोणपर्यन्तं पर्युक्ष्य अप्रदक्षिणमीशानकोणपर्यन्तं

में उपयमन कुशा को लेकर दाहिने हाथ में प्रादेश प्रमाण की तीन समिधाओं को घी में भिगोकर दो अंगुल ऊपर मध्यमा अनामिका अँगूठे के मूल भाग में धारण की हुई, तर्जनी की तरह मोटी समिधा को एक साथ चुपचाप अग्नि में प्रक्षेप कर सपवित्र वाली प्रोक्षणी पात्र के जल से चुल्लु द्वारा ग्रहण कर ईशान कोण से प्रक्षेप कर फिर ईशान पर्यन्त प्रदक्षिण क्रम से पर्युक्षण कर अप्रदक्षिण क्रम से ईशान कोण पर्यन्त अपने दाहिने हाथ को केवल घुमा दे। तदनन्तर उन पवित्र को प्रणीता पात्र में रख अपने दाहिने जानु को मोड़कर ब्रह्मा से कुशों द्वारा अन्वारब्ध (स्पर्श) कर उपयमन कुशा के सहित अपने हाथ की अँगुलियों को फैलाकर उस हाथ को हृदय में लगा

हस्तं पर्यावर्तयेत् । ततः पवित्रे प्रणीतासु निधाय दक्षिणं जान्वाच्य ब्रह्मणा कुशैरन्वारब्धः उपयमन कुशस हितं प्रसारितांगुलिहस्तं हृदि निधाय दक्षिणहस्तेन मूले चतुरंगुलं त्यक्त्वा शङ्खसन्निभ-मुद्रया स्रुवं गृहीत्वा समिद्धतमेऽग्नौवायव्य कोणा-दारभ्याग्निकोणपर्यन्तं प्राञ्चं वासन्त तघृतधारया मनसा प्रजापतिं ध्यायन् स्रुवेण तूष्णीं सशेषं मौनी जुहुयात् । नात्र स्वाहाकारः । इदं प्रजापतये न मम इति यजमानेन त्यागः कर्तव्यः । होमत्यागा-

---

कर दाहिने हाथ से स्रुव के मूल से चार अंगुल छोड़कर 'शंख' मुद्रा से स्रुव को ग्रहण कर प्रदीप्त अग्नि में वायव्य कोण से प्रारम्भ कर अग्नि कोण पर्यन्त या पूर्व दिशा की तरफ निर-न्तर घी की धारा द्वारा प्रजापति का मन से ध्यान करें । स्रुव से चुप-चाप शेष के सहित हवन करे. इसमें स्वाहाकार नहीं है । 'इदं प्रजापतये न मम्' इस वाक्य का यजमान त्याग करें । होम त्याग के बाद स्रुवस्थित आज्य का सर्वत प्रोक्षणी पात्र में प्रक्षेप करें ।

नन्तरं स्रुवाव शिष्टस्याज्यस्य सर्वत्र प्रोक्षणीपात्रे प्रक्षेपः कार्यः। ततो नैर्ऋतिकोणादारभ्येशानकोण पर्यन्तं प्राच्यं वा—ॐ इन्द्राय स्वाहा इति जुहुयात्। इदमिन्द्राय न मम' इति त्यजेत्। तत उत्तरपूर्वार्द्धे—ॐ सोमाय स्वाहा—इदं सोमाय न मम इति जुहुयात् ततो यजमानः द्रव्यत्यागं कुर्यात्। तत्र च बहुकर्तृके होमे यथाकालं प्रत्या हुतित्यागस्य कर्तुमशक्य त्वात्सर्वंहवनीये द्रव्यं देवताश्च मनसा ध्यात्वा त्यजेत्। तच्चैवम् इदमुप-

---

तदनन्तर—निर्ऋतिकोण से आरम्भ कर ईशान कोण पर्यन्त या पूर्व की तरफ 'इन्द्राय स्वाहा' इससे हवन करे। 'इन्द्रमिन्द्राय न मम्' इससे त्याग करें। फिर उत्तर पूर्वार्ध में 'अग्नये स्वाहा' से हवन करें। दक्षिण पूर्वार्ध में 'सोमाय स्वाहा' से हवन करें। तदनन्तर यजमान त्याग करें। क्योंकि बहुकर्तृक हवन में यथा समय प्रति आहुति के बाद प्रोणाणी पात्र में त्याग करना असम्भव है। अतः सब हवनीय द्रव्य तथा देवताओं को मन से ध्यान कर 'इदमुपकल्पितं समित्ति

कल्पितं समित्तिलादिद्रव्यं (यथासम्पादितम्) या या यक्ष्य माण देवतास्ताभ्यस्ताभ्यो मया परित्यक्तं न ममेति साक्षतजलं भूमौ क्षिपेत्। यथादैवतमस्तु।

॥ इति कुशकण्डिका ॥

लादि द्रव्यं याया यक्ष्यमाण देवतास्ताभ्य स्ताभ्यो मया परित्यक्तं न मम्' इस वाक्य को पढ़कर जल सहित अक्षत भूमि में प्रक्षेप करें 'यथादैवतमस्तु' यह कहें।

॥ इति कुशकण्डिका ॥

❋ ग्रहादि-होमः ❋

आचार्य गणानां त्वा० से स्योना पृथिवि० निम्न मन्त्रों का उच्चारण करते हुए पूजनकर्त्ता से आहुतियाँ दिलावें—

ॐ गणानान्त्वा गणपतिर्ठ० हवामहे प्रियाणान्त्वा प्रियपतिर्ठ० हवामहे निधिनान्त्वा निधिपतिर्ठ० हवामहे व्वसो मम। आहमजानि गर्भधमात्वम जासि गर्भधम् स्वाहा।

अम्बेऽअम्बिकेऽम्बालिके न मानयति कश्चन। ससस्त्य श्वकः सुभद्रिकां काम्पीलवा सिनीम् स्वाहा।

आ कृष्णेन रजसा वर्त्तमानो निदेशयन्नमृतं मर्त्यं च। हिरण्येन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा।

इमन्देवाः ऽअसपत्नर्ठ० महते क्षात्राय महते ज्यैष्ठ्याय महते जान राज्या येन्द्र स्येन्द्रियाय। इमम पुष्य पुत्रममुष्यै पुत्र मस्यै व्विशऽएष वोऽमी राजा सोमोऽस्माकं ब्राम्हणानार्ठ० राजा स्वाहा।

अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽअयम्। अपाᳬं रेताᳬं सि जिन्वति स्वाहा।

उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सृजेथामयं च। अस्मिन्त्सधस्थे ऽअध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत स्वाहा।

बृहस्पते ऽअति यदर्यो ऽअर्हाद्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवसऽऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् स्वाहा।

अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः ऋतेन सत्यमिन्द्रियं विपानᳬं शुक्रमन्धस ऽइन्द्रस्ये न्द्रियमिदं पयो ऽमृतं मधु स्वाहा।

शं नो देवीरभिष्टय ऽआपो भवन्तु पीतये शंय्योरभिस्रवन्तु नः स्वाहा।

कया नश्चित्र ऽआभुवदूती सदा वृधः सखा। कया शचिष्ठया ऽवृता स्वाहा।

केतुं कृण्वन्न केतवे पेशो मर्य्या अपेशसे समुषद्भिरजायथाः स्वाहा।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टि वर्द्धनम्। उर्व्वा रूकमिव बन्धनान्मृत्यो र्मुक्षीय माऽमृतात् स्वाहा।

श्रीश्चते लक्ष्मीश्चपत्न्या वहोरात्त्रेपार्श्वे नक्ष-त्राणि रूप मश्विनौ व्यात्तम्। इष्णा निषाणा मुंम ऽइषाण सर्व्वं लोकं म ऽइषाण स्वाहा।

यदक्रन्द्रः प्रथमं जायमान ऽघन्त्समुद्रादुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जात ते ऽअर्व्वन स्वाहा।

विष्णो ररराटमसि विष्णोः श्नप्त्रे स्थो वि-ष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि वैष्णवमसि विष्णो त्वा स्वाहा॥

आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्च्चसी जायतामो राष्टे राजन्यः शूर ऽइषव्व्यो ऽतिव्व्याधी महारथो जायतां दोग्ध्री धेनुर्व्वोढा नड्वानाशुः सप्तिः पुरन्ध्रिर्योषा जिष्णु रथेष्ठाः सभेयो युवास्य यज-मानस्य व्वीरो जायतां निकामे निकामे नः पर्ज्ज-न्यो व्वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योग-क्षेमो नः कल्पताम् स्वाहा।

सजोषां ऽइन्द्र सगणो मरुद्भिः सोमं पिबव्वृत्रहा शूर बिद्वान। जहि शत्रूँ २॥ रप मृधो नुद स्वाथा भयं कृणुहि विश्वतो नः स्वाहा।

यमाय त्वाङ्गिरस्वते पितृमहे स्वाहा। स्वाहा घर्माय स्वाहा घर्मः पित्रे स्वाहा।

कार्षिरसि समुद्रस्य त्वाक्षित्या उन्नयामि। समापो ऽअद्भिरग्मत समोषधीभिरोषधीः स्वाहा।

चित्रावसो स्वस्ति ते पारमशीय स्वाहा।

अग्निं दूतं पुरो दधे हव्य वाहमुप ब्रुवे। देवाँ २॥ ऽआसादयादिह स्वाहा।

आपो हिष्ठा मयोभुवस्तान ऽउर्ज्जे दधातन। महेरणा यचक्षसे स्वाहा।

स्योना पृथिवि नो भवान्नृक्षरा निवेशनी। यच्छानः शर्म्म सप्रथाः स्वाहा।

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्‌ समूढमस्य पाठं० सुरे स्वाहा।

इन्द्र ऽआसां नेता बृहस्पतिर्द्दक्षिणा यज्ञः

पुर ऽएतु सोमः । देवसेनानाम भिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्ग्रम् स्वाहा ।

अदित्यै रास्ना सीन्द्राण्या उष्णीष÷पूषासि घर्म्माय दीष्व स्वाहा ।

प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो ऽअस्त्वय-ममुष्य पितासावस्य पिताव्वयर्ठ० स्याम पतयो रयीणार्ठ० स्वाहा ॥

नमोऽस्तु सर्पेभ्यो ये के च पृथिवी मनु । ये अन्तरिक्षे पे दिवि तेभ्य÷सर्पेभ्यो नम÷स्वाहा ।

ब्रह्म यज्ञानां प्रथमं पुरस्ताद्वि सीमतः सुरुचो व्वेन ऽआवः । स बुध्न्या ऽउपमा ऽअस्य व्विष्ठाः सतश्च योनिमसतश्च व्विव÷स्वाहा ।

गणानान्त्वा गणपतिर्ठ० हवामहे प्प्रिया-णान्त्वा प्प्रियपतिर्ठ० हवामहे निधिनान्त्वा निधि पतिर्ठ० हवामहे व्वसो मम । आहम जानि गब्र्भधमात्वम जासि गब्र्भधम् स्वाहा ।

अम्बे ऽअम्बिके ऽम्बालिके न मानयति

कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् स्वाहा ॥

व्यायो ये तेसहस्रिणो रथासस्तेभिरागहि । नियुत्वान्त्योसोपीतये स्वाहा ।

घृतं घृतपावनः पिबत व्वसां व्वसापावानः पिबन्तान्त रिक्षस्य हविरसि स्वाहा । दिश ÷ प्रदिश ऽआदिशो व्विदिश ऽउद्दिशो दिग्भ्यः स्वाहा ।

या वां कशा मधुमत्यश्विना सूनृतावती तया यज्ञं मिमिक्षतम् स्वाहा ।

वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशोऽअनमी वो भवानः यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा ।

नहिस्पशम् विदन्नन्न्य मस्माद्वैश्वानरात्पुर ऽएनारमग्नेः । ऐमेनमवृधन्नमृता अमर्त्यं वैश्नानर क्षैत्रजित्त्याय देवाः स्वाहा ।

त्रातारमिन्द्र मवितार मिन्द्रꣳ हवे हवे सुह्वꣳ शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति मघवा धात्विन्द्र स्वाहा ।

त्वन्नो ऽअग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य। त्राता तोकस्य तनये गवामस्य निमेषठं॰ रक्षमाणस्तव व्रते स्वाहा।

यमाय त्वाङ्गिरस्वते पितृमहे स्वाहा। स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे स्वाहा।

असुन्वन्त मयजमानमिच्छस्ते नस्ये त्यामन्विहि तस्करस्य। अन्न्यमस्मदिच्छ सात ऽइत्या नमो देवि निऋृते तुभ्यमस्तु स्वाहा।

तत्त्वा यामि ब्राह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भि÷। अहेडमानो वरुणेह बोद्ध्युरुशठं॰ समान ऽआयुः प्रमोषिः स्वाहा।

आ नो नियुद्भि÷शतिनी भिरध्वरठं॰ सहस्त्रिणी भिरुपयाहि यज्ञम्। व्वायो ऽअस्मिन्त्सवने मादयस्व यूयं पातस्वस्तिभिः सदा नः स्वाहा।

वयठं॰ सोम व्रते तव मनस्तनूषु विभ्रतः प्रजावन्तः सचेमहि स्वाहा।

तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्व-

मवसे हूमहे व्वयम् । पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्त्ये स्वाहा ।

अस्मे रुद्रा मेहना पर्व्वता सो व्वृत्रहत्ये भर-हूतौ सजोषाः यः शर्ठ० शते स्तुवते धायि पज्र इन्द्र ज्येष्ठा ऽअस्माँ २।। अवन्तु देवाः स्वाहा ।

स्योना पृथिवि नो भवान्नृक्षरा निवेशनि यच्छानः शर्म्म सप्प्रथाः स्वाहा ।

।। इति ग्रहादि होम ।।

❋ वास्तु होम ❋

स्रुवे में घी भरकर चारों स्तमभ स्थानों में स्तमभ के अभाव में शिला पर चारो कोणों पर अग्नि कोण से प्रारम्भ कर निम्न आहुतियाँ देवें ।

ॐ अच्युताय भौमाय स्वाहा ।

इदं अच्युताय भौमय नमम् ।

इसके पश्चात् आग्नेय कोण में स्थित स्तमभ अथवा तद् अभाव में शिला का स्पर्श कर निम्न मन्त्रों का उच्चारण करें—

इमामुच्छ्रयामि भुवनस्य नाभिं वसोर्द्धारा प्रतरणीं वसूनाम् । इहैव ध्रुवां निमिनो मिशालां क्षेमे तिष्ठतु घृतमुक्ष माणा ।

अश्वावती गोमती सूबता वत्युच्छ्र यस्व महते सौभगाय । आत्वा शिशुरा क्रन्दत्वा गात्रो धेनवो वाश्यमानाः ।

आत्वाकुमार स्तरुण आवत्सौ जगदैः सह । आत्वा परिस्रुतः कुम्भ आदध्नः कलशैरूप क्षेमस्य पत्नी वृहती सुवासा रयिन्नो धेहि सुभगे सुवीर्यम् अश्वादगोम दूर्ज स्वत्पर्णं वनस्पते रिव । अभिनः पूर्यतार्ठ० रयिरिद मनु श्रेयो वसानः ।

इसी प्रकार नैऋत्य वायव्य—ईशान कोण के स्तम्भों में स्पर्श करते हुए इन चारों मन्त्रा की आचार्य आवृत्ति करें । इसके पश्चात् गृह से बाहर निकल कर गृह की ओर मुख कर मुख्य द्वार के समिप खड़े होकर ब्रह्मा से प्रवेशकर्त्ता यजमान (पूजनकर्ता) पूछें ।

ब्रह्मन प्रविशामि, ब्रह्मा कहें:—प्रविशस्व ।

इस तरह ब्रह्मा से आज्ञा पाकर गृह प्रवेश करें । गृह प्रवेश करते समय निम्न मन्त्र पूजनकर्ता पढ़ें:—

ॐ ऋतंम प्रपद्ये शिवं प्रपद्ये ।

तत्पश्चात् दो घृत की आहुति आचार्य इन मन्त्रों का उच्चारण करते हुए पूजनकर्ता से प्रदान करवाये :—

ॐ इह रति रिह रमध्यमिह घृतिरिह स्व-घृतिः स्वाहा । इदंग्नये न मम् ।

ॐ उप सृजान्ध रूणं मात्रे वरुणो मातरं धयन् । रायस्पोषमस्मासु दीधरत्तस्वाहा । इदं-ग्नये नम् ।

ॐ वास्तोष्पते प्रतिजानी ध्यस्मान् स्वावेशो अनमी वो भवानः । यत्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा ।

ॐ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिदोः अजरासस्ते सख्ये स्याम् पितेव पुत्रान्प्रतितन्नो जुषस्य । शन्नो भव द्विपदे शं चतुष्पदे स्वाहा ।

ॐ वास्तोष्पते शग्मया सठ० सदाते सचीम हिरण्यमया गातु म चहिक्षेम उतयोगे वरन्नो यूयं पातस्वस्तिभिः सदा नः स्वाहा ।

ॐ अमी वहा वास्तोष्पते विश्वारूपाशया विशन् सखा सुशेव एधिः नः स्वाहा ।

ॐ वास्तोष्पते ध्रुवा स्थूणां सन्नं सौम्या नां द्रप्सोभेत्ता पुरां शाश्वती ना मिक्षे मुनीनां सखा स्वाहा ।

इदं वास्तोष्पतये नमम ॥

इसके पश्चात् ब्रह्मा से अन्वारब्ध करके पूजनकर्ता आघाराज्य भाग संज्ञक निम्न आहुतियाँ प्रदान करें—

१—ॐ भूः स्वाहा—इदं अग्नये नमम ।

२—ॐ भुवः स्वाहा–इदं वायवे नमम ॥

३—ॐ स्वः स्वाहा इदं सूर्याय नमम ।

४—ॐ त्वन्नोऽअग्ने श्ररणस्य विद्वान्देवस्यहेडोऽअवया सिसीष्ठाः । यजिष्ठो व्वह्नितमः शोशुचानो विश्वाद्वेषार्ठ० सिप्रमुमुग्ध्यस्मत् स्वाहा ।

५ —ॐ सत्वन्नोऽअग्ने नमो भवोतीने दिष्ठोऽअस्याऽउषसो व्यष्टौ । अवयक्ष्वनो व्वरूणर्ठ० रराणोव्वी हिमृर्गकर्ठ० सुहवोनऽएधि स्वाहा ।

६ —ॐ अयाश्चाग्नेऽस्यनभि शस्तिपाश्च

सत्यमित्वमयाऽअसि । अयानो यज्ञं वहास्यया नो धेहि भेषजठं॰ स्वाहा ।

७—ॐ येते शतं वरूण ये सहस्रं यज्ञिया पाशा वितता महान्तः । ते भिर्नोऽअद्य सवितो विष्णु विंश्वे मुञ्चन्तु मरूतः स्वर्क्का स्वाहा ।

८—ॐ उदुत्तमं व्वरूण पाशमस्मदवा धमं व्विमध्यमठं॰ श्रथाय । अथाव्वयमा दिव्य-व्रतेत वानागसोऽअदितये श्याम स्वाहा ।

९—ॐ प्रजापतये स्वाहा–इदं प्रजापतये नमम ।

इसके पश्चात् निम्न मन्त्रों से खीर की आहुतियों से हवन करे—

१—अग्निमिन्द्रं र बृहस्पतिं विश्वान्देवा नूयह्वये सरस्वतीं च वाजीं च वास्तु मे दत्तवा जिनः स्वाहा इदंग्नये इन्द्राय बृहस्पतये विश्वेभ्यो देवेभ्यः सरस्वत्यै वाज्यै च न मम ॥

ॐ सर्पदेवजनान् सर्वान् हिमवन्तठं॰ सु-

दर्शनम् । वसूं श्च रूद्रानादित्या नीशातं जगदैः

सह। एतान सर्वा प्रपद्येऽहं वास्तु मे दत्तवा जिनः स्वाहा। इदं सर्पदेवजनेभ्यो हिमव्वते सुदर्शनाय वसुभ्यो रूद्रेभ्य आदित्येभ्य ईशानाय ईशानाय जगदेभ्यश्चय:।

पूर्वाहम पराहं चोभौ मध्यन्दिना सह। प्रदोषमर्धरा त्रंच व्युष्टां देवीं महापथाम्। एता० इदं पूर्वा ह्रायापरा ह्रायम ध्यन्दिनाम् प्रदोषायार्द्ध रात्रा भव्युष्टायै देव्यै महापथा यैचनः। कर्त्तारं च विकर्त्तारं विश्वकर्माणमो वधीं कव्वन स्पतीन् एता। इदं कर्त्रे विकर्त्ते विश्व कर्मणे ओषधी भ्योव्वन स्पतिभ्यभव० धातारं च विधातारं निधीनां च पतिं सह। एतान्स० इदं धात्रे विधात्रे निधीनां पतये च स्योनर्ठ० शिवमिदं वास्तु मे दत्तं ब्रह्म प्रजापती। सर्वा कव्व देवताः स्वाहा। इदं ब्रह्मणो प्रजापतये सर्वाभ्यो देवताभ्यकवः।

इसके पश्चात् शिख्यादि एक पदान्त वास्तुमण्डलगत देवताओं के लिए प्रत्येक नाम से १०८ या २८ या ८ बार घी, खीर या शाकल्य से आहुतियाँ देवे—

१ : ॐ शिखिने स्वाहा । इदं शिखिने नमम ॥
२ : ॐ पर्जन्याय स्वाहा । इदं पर्जन्याय नमम ॥
३ : ॐ जयन्ताय स्वाहा । इदं जयन्ताय नमम ॥
४ : ॐ कुलिशायुधाय स्वाहा । इदं कुलिशायु-
धाम नमम ॥
५ : ॐ सूर्याय स्वाहा । इदं सूर्याय नमम ॥
६ : ॐ सत्याय स्वाहा । इदं सत्याय नमम ॥
७ : ॐ भृशाय स्वाहा । इदं भृशाय नमम ॥
८ : ॐ आकाशाय । इदं आकाशाय नमम ॥
९ : ॐ वायवे स्वाहा । इदं वायवे नमम ॥
१० : ॐ पूष्णो स्वाहा । इदं पूष्णो नमम ॥
११ : ॐ वित्थाय स्वाहा । इदं वित्थाय नमम ॥
१२ : ॐ गृहत्तताय स्वाहा । इदं गृहत्तताय नमम॥
१३ : ॐ यमाय स्वाहा । इदं यमाय नमम ॥
१४ : ॐगन्धर्वाय स्वाहा । इदं गन्धर्वाय नमम ॥
१५ : ॐभृङ्ग राजाय स्वाहा । इदं भृङ्ग राजाय
नमम ॥

१६ : ॐ मृगाय स्वाहा । इदं मृगाय नमम ॥

१७ : ॐ पितृभ्यो स्वाहा। इदं पितृभ्योन नमम ॥
१८ : ॐ दौवारिकाय स्वाहा। इदं दौवारिकाय नमम ॥
